**R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र ४ थे**

**विषय: ऐतिहासिक काव्ये (19R446)**

**दिनांक :०४/०७/२०२२** **गुण : ६०** **वेळ : स. १०.०० ते दु. १२.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ समुचितं पर्यायं विचिनुत।** **(०६)**

१) हर्षचरितस्य रचयिता ……… ।

अ) बाणभट्टः आ) दण्डी इ) राजशेखरः ई) भट्टिः

२) हर्षवर्धनस्य स्वसा ………… ।

अ) भाग्यश्रीः आ) धनश्रीः इ) राज्यश्रीः ई) विद्याश्रीः

३) ………. नाम बृहदश्ववारः।

अ) हर्षः आ) राज्यवर्धनः इ) कुन्तलः ई) सिंहनादः

४) ……… हर्षाय प्रमाददोषान् कथयति।

अ) चन्द्रगुप्तः आ) समुद्रगुप्तः इ) स्कन्दगुप्तः ई) कुमारगुप्तः

५) ………. सप्त व्यसनानि त्यक्तवन्तः

अ) गुप्तवंशीयाः आ) वाकाटकवंशीयाः इ) गङ्गालुपेन्द्राः ई) कदम्बवंशीयाः

६) ऐहोळे लेखस्य कर्ता

अ) कालिदासः आ) भारविकीर्तिः इ) रविकीर्ति ई) पुलकेशी

**प्र. २ अ) एकस्य स्पष्टीकरणं माध्यमभाषया लिखत।** **(०६)**

१) औरसदर्शनं हि यौवनं शोकस्य। २) श्रूयतां मे प्रतिज्ञा।

**आ) एकस्य स्पष्टीकरणं माध्यमभाषया लिखत।** **(०६)**

१) कावेरी द्रुतशफरी विलोलनेत्रा। २) चालुक्यकुलविपुलजलनिधिर्जयति।

**प्र. ३ अ) प्रश्नद्वयं माध्यमभाषया उत्तरत।** **(१२)**

१) हर्षस्य क्रोधोत्पत्तिं वर्णयत। २) अशौचदिवसान् विवृणुत। ३) राज्यवर्धनस्य विरक्तिविचारान् लिखत।

**आ) एकं प्रश्नं माध्यमभाषया उत्तरत।** **(०६)**

१) ऐहोळेलेखस्य महत्त्वं वर्णयत। २) सप्त व्यसनानि तथा अवभृथस्नानविषये लिखत।

**प्र.४. अ) अनुच्छेदद्वयं माध्यमभाषया अनुवदत।** **(२०)**

१. अपि चार्ये तपोवनं गते जिजीविषुः को मनसापि महीं ध्यायेत्। कुलिशशिखरखरनखर–प्रचयप्रचण्डचपेटापाटितमत्तमातङ्गोत्तमाङ्गमदच्छटाच्छुरितचारुकेसरभारभास्वरमुखे केसरिणी वनविहाराय विनिर्गते निवासगिरिगुहां कः पाति पृष्ठतः। प्रतापसहाया हि सत्त्ववन्तः। कश्चपलां राजलक्ष्मीं प्रत्यनुरोधोऽयमार्यस्य यदियमपि न चीवरान्तरितकुचा कुशकुसुमसमित्–पलाश–पूलिकां वहन्ती तत्रैव तपोवने वनमृगीव नीयते जराजालिनी।

२. स च प्रत्यग्रत्वष्टटङ्क–तष्टतनुः इव वमदृबहलरुधिर–रसमांसच्छेदलोहितच्छविः अपरपारावारपयसि ममज्ज मञ्जिष्ठारुणः अरुणसारथिः। मुकुलायमान–कमलिनीकोशविकलं चकाण चञ्चरीककुलं कमलसरसि।

सविधविरहव्याधिविधुरवधूवध्यमानं बबन्ध बन्धाविव विबुद्धबन्धूकभासि भास्वति सास्रां दृशं चक्रवाकचक्रवालम्।

३. आत्मस्थसमस्तमत्तमातङ्गसाधनोप्यस्पृष्टो मदेन, भूतिमानपि स्नेहमयः पार्थिवोऽपि गुणमयः करिणामिव दानवतामुपरि स्थितः, स्वामितामिव स्पृहणीयां भृत्यतामप्यपरिभूतामुद्वहन्नेकभर्तृभक्तिनिश्चलां कुलाङ्गनामिवानन्यगम्यां प्रभुप्रसादभूमिमारुढः, निष्कारणबान्धवो विदग्धानाम्, अभृतभृत्यो भजहताम्, अक्रीतदासो विदुषां स्कन्दगुप्तो विवेश राजकुलम्।

**आ) एकस्य श्लोकस्य अनुवादं माध्यमभाषया कुरुत।** **(०४)**

१) तदनु चिरपरिमेयश्चालुक्यकुलविपुलजलनिधिर्जयति। पृथिवीमौलिललाम्नां यः प्रभवः पुरुषरत्नानाम्।।

२) नलमौर्यकदम्बकालरात्रिस्तनयस्तस्य बभूव कीर्तिवर्मा। परदारनिवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा।।

----------